**दिनाङ्क :- 04.08.2025**

**प्रातः - 06:55**

**अश्विनी वैष्णवः गुजरात**

**रेलमंत्री अश्विनी वैष्णवः ह्यः गुजरातस्य भावनगर-रेलस्थानकात् भावनगर-अयोध्या छावनी इत्यस्य साप्ताहिक-रेलयानस्य उद्घाटनं विहितवान्। मन्त्री रेवा-पुणे नगरयोः जबलपुर रायपुर नगरयोः मध्ये च अन्यद्द्वयं रेल-यानम् अपि समुद्घाटितवान्। मन्त्री अवोचत् यत् गत एकादश वर्षेषु चतुः त्रिंशत् सहस्र किलोमीटर यावत् नूत्नाः रेल्मार्गाः स्थापिताः, भारतीय-रेल-याने अविरतं परिवर्तनं विधीयते। भावनगर-रेल्-स्थानके जनसमूहं सम्बोधयन्, सः रेल नेटवर्क इत्यस्य विकासाय, आधुनिकीकरणाय, विस्ताराय च, रेलयाने सुरक्षां स्वच्छतां च सुनिश्चेतुं सर्वकारस्य प्रतिबद्धतां पुनः दृढीकृतवान्। मन्त्री प्रत्यपादयत् यत् देशे त्रयोदशशत स्थानकानां पुनर्विकासः विश्वस्य बृहत्तमा स्थानक-पुनर्विकास-परियोजना अस्ति इति।**

**पीएम कन्दला**

**दीनदयाल-नौकाश्रय-प्राधिकरणेन कन्दला-नगरस्य नौकाश्रयक्षेत्रे भारतस्य प्रथमं मेक्-इन्-इण्डिया-हरित-हैड्रोजन्-संयंत्रं प्रारब्धम्। प्रधानमन्त्री-नरेन्द्र-मोदी-वर्यस्य नेट-ज़ीरो-विज़न् प्रति इयं प्रबल पदयात्रा वर्तते इति नौकाश्रय-प्राधिकरणम् स्पष्टयति। एकस्मिन् जन संचार पटले श्रीमोदी प्रत्यपादयत् यत्, एषः प्रशंसनीयः प्रयासः , सुस्थिरतां च समर्थयति, नेट-ज़ीरो-विज़न् इत्यस्मै शक्तिं च यच्छति।**

**जापान-भारत (विश्व प्रदर्शनी)**

**जपान्-देशे, ओसाका-नगरे आयोजितायां पंचविशत्युत्तर द्विसहस्र तमवर्षस्य विश्व-प्रदर्शन्यां भारत-मण्डपः इति शीर्षकः परह्यः विंशतिः सहस्र तः अधिकान् अभ्यागतान् आकर्षयत्, यतः जनाः भारतस्य सांस्कृतिकपरम्परायाः हस्तशिल्पस्य च समृद्धिं द्रष्टुं आगच्छन्। प्रदर्शन्यां अन्येषु आकर्षणेषु 'चन्द्रयान्-क्षेत्रम्' अन्तर्भवति, यत् अन्तरिक्ष-अन्वेषणे भारतस्य प्रवर्तक-उपलब्धीः, तस्य चन्द्र-अभियानानि च प्रदर्शयति। एषा अन्यतमा प्रदर्शनी भारतस्य मृदुशक्तिं प्रदर्शयति, बहुध्रुवीयविश्वे तस्य पदचिह्नानि स्थापयति। अस्मिन् प्रदर्शने षष्ट्यधिकैकशत तः अधिकाः देशाः, नव अन्ताराष्ट्रियसंस्थाः च भागम् अगृह्णन्।**

गडकरी- इन्फ्रा-नेतृत्वेन अर्थव्यवस्था :

केन्द्रीयपरिवहनराजमार्गमन्त्रिणा नितिनगडकरिणा घोषितं यत् आगामिवर्षद्वये आन्ध्रप्रदेशस्य मार्गाः अमेरिकीय मार्गसदृशाः भविष्यन्ति। परह्यः आन्ध्रप्रदेशस्य मङ्गलागिरीनगरे सप्तविंशति मार्गविकासपरियोजनानां आधारशिलास्थापनं कृत्वा त्रयस्त्रिंशोत्तर द्विशताधिक पञ्चसहस्रकोटिरूप्यकाणां सम्पन्नद्वयोः परियोजनयोः राष्ट्राय समर्पणानन्तरं मुख्यमन्त्रिणा एन. चन्द्रबाबू नायडूना सह एकं उपवेशनं संबोधयन् तेनोदीरितं यत् नवपरियोजनाभिः आन्ध्रप्रदेशं तेलंगाना कर्णाटक ओडिशा तमिलनाडु राज्यं च निकटतया संयोजयिष्यते। केन्द्रीयमन्त्री घोषितवान् यत् विजयवाडा-हैदराबाद-मार्गस्य विकासः राजमार्गरूपेण भविष्यति, येन द्वयोः नगरयोः मध्ये यात्रायाः समयः केवलं द्विहोरा यावत् भविष्यति।

क्रिकेट

क्रिकेट क्रीडायां भारतेन चतु:सप्तत्यधिक त्रिशत-धावनांकाना प्रदत्तस्य बृहत्-लक्ष्यस्य अनुसरणं कुर्वत् इंग्लैंड-दलं भारत इंग्लैण्ड दलयोर्मध्ये प्रचालितस्य पञ्चमान्तिमस्य टेस्ट क्रीडाया: चतुर्थेदिने ह्य: अन्तिम सूचना प्राप्तिं यावत् इंग्लैण्ड दलं चतुषष्ठ्यधिकैकशत धावनांके स्थगितम्।